# 1

## देवी माहात्म्यं

## Devī Māhātmyaṃ

(Yā Devī)

TANTROKTAM DEVĪSŪKTAM

Introduction

नमो देव्यै महादेव्यै शिवायै सततं नमः
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम् ९

Namo devyai mahādevyai śhivāyai satataṃ namaḥ
Namah prakṛtyai bhadrāyai niyatāḥ praṇatāḥ sma tām

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः १०

Raudrāyai namo nityāyai gauryai dhātryai namo namaḥ
Jyotsnāyai chendurūpiṇyai sukhāyai satataṃ namaḥ

कल्याण्यै प्रणतां वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः
नैर्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः ११

Kalyāṇyai praṇatāṃ vṛiddhyai siddhyai kurmo namo namaḥ
Nairṛtyai bhūbhṛitāṃ lakṣhmyai śharvāṇyai te namo namaḥ

दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै
ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः १२

Durgāyai durgapārāyai sārāyai sarvakāriṇyai
Khyātyai tathaiva kṛiṣhṇāyai dhūmrāyai satataṃ namaḥ

अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः
नमो जगत्प्रतिष्ठायै देव्यै कृत्यै नमो नमः १३

Atisaumyātiraudrāyai natāstasyai namo namaḥ
Namo jagatpratiṣhṭḥāyai devyai kṛityai namo namaḥ

---------

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १४-१६

Yā Devī sarvabhūteṣhu viṣhṇumāyeti śhabditā
Namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु चेतनेत्यभिधीयते
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः १७-१९

Yā Devī sarvabhūteṣhu chetanetyabhidhīyate
Namastasyai namastasyai namastasyai namo namaḥ

या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः २०-२२

Yā Devī sarvabhūteṣhu buddhirūpeṇa saṃsthitā
Namastasyai namastasyai namastasyai namo namaha

| | | | | | |
|---|---|---|---|---|---|
| २३-२५ | निद्रा | nidrā | ५०-५२ | श्रद्धा | śhraddhā |
| २६-२८ | क्षुधा | kṣhudhā | ५३-५५ | कान्ति | kānti |
| २९-३१ | छाया | chhāyā | ५६-५८ | लक्ष्मी | lakṣhmī |
| ३२-३४. | शक्ति | śhakti | ५९-६१ | वृत्ति | vṛitti |
| ३५-३७ | तृष्णा | tṛṣṇā | ६२-६४ | स्मृति | smṛti |
| ३८-४० | क्षान्ति | kṣhānti | ६५-६७ | दया | dayā |
| ४१-४३ | जाति | jāti | ६८-७० | तुष्टि | tuṣhṭi |
| ४४-४६ | लज्जा | lajjā | ७१-७३ | मातृ | mātṛ |
| ४७-४९ | शान्ति | śhānti | ७४-७६ | भ्रान्ति | bhrānti |

इन्द्रियाणामधिष्ठात्री भूतानां चाखिलेषु या
भूतेषु सततं तस्यै व्याप्तिदेव्यै नमो नमः ७७

Indriyāṇāmadhiṣṭhātrī bhūtānāṃ chākhileṣhu yā
Bhūteṣhu satataṃ tasyai vyāptidevyai namo namaḥ

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्
नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ७८-८०

Chitirūpeṇa yā kṛitsnametadvyāpya sthitā jagat
Namastasyai namastasyai namastasyai namo namaḥ

# 2

## महालक्ष्म्यष्टक स्तोत्रम्

Mahālakṣhmyaṣhṭaka Stotram
(from the Mahā Lakṣhmī Pūja in Padma Purāṇa)

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते
namaste'stu mahāmāye śhrīpīṭhe surapūjite

शंखचक्रगदाहस्ते महालक्ष्मि नमोऽस्तु ते १
śhaṇkhachakragadāhaste Mahālakṣhmi namo'stu te

नमस्ते गरुडारूढे कोलासुरभयंकरि
namaste garuḍārūḍhe kolāsurabhayaṇkari

सर्वपापहरे देवी महालक्ष्मि नमोऽस्तु ते २
sarvapāpahare Devī Mahālakṣhmi namo'stu te

सर्वज्ञे सर्ववरदे सर्वदुष्टभयंकरि
sarvajñe sarvavarade sarvaduṣhṭabhayaṇkari

सर्वदुःखहरे देवी महालक्ष्मि नमोऽस्तु ते ३
sarvaduḥkhahare Devī Mahālakṣhmi namo'stu te

सिद्धिबुद्धिप्रदे देवी भुक्तिमुक्तिप्रदायिनि
siddhibuddhiprade Devī bhuktimuktipradāyini

मन्त्रपूते सदा देवी महालक्ष्मि नमोऽस्तु ते ४
mantrapūte sadā Devī Mahālakṣhmi namo'stu te

आध्यन्तरहिते देवी आध्यशक्तिमहेश्वरि
ādhyantarahite Devī ādhyaśhaktimaheśhvari

योगजे योगसम्भूते महालक्ष्मि नमोऽस्तु ते ५
yogaje yogasambhūte Mahālakṣhmi namo'stu te

स्थूलसूक्ष्ममहारौद्रे महाशक्तिमहोदरे
sthūlasūkṣhmamahāraudre mahāśhaktimahodare

महापापहरे देवी महालक्ष्मि नमोऽस्तु ते ६
mahāpāpahare Devī Mahālakṣhmi namo'stu te

पद्मासनस्थिते देवी परब्रह्मस्वरूपिणि
padmāsanasthite Devī parabrahma-svarūpiṇi

परमेशि जगन्मातर्महालक्ष्मि नमोऽस्तु ते ७
parameśhi jaganmātar Mahālakṣhmi namo'stu te

श्वेताम्बरधरे देवी नानालङ्कारभूषिते
śhvetāmbaradhare Devī nānālaṇkārabhūṣhite

जगत्स्थिते जगन्मातर्महालक्ष्मि नमोऽस्तु ते ८
jagatsthite jaganmātar Mahālakṣhmi namo'stu te

# 3

## श्रीमद् भागवतम् ८ ८ ८

Shrīmad Bhāgavatam 8.8.8
(from the Mahālakṣhmī Pūja)

### ततश्चाविरभूत् साक्षात्

Tataśh chāvirabhūt sākṣhāt

### श्री रमा भगवत् परा

Śhrī-Ramā Bhagavat-Parā

### रञ्जयन्ती दिशः कान्त्या

Rañjayantī diśhaḥ kāntyā

### विद्युत् सौदामनी यथा

Vidyut saudāmanī yathā

# 4

## अगस्त्यमुनि प्रोक्तम्

Agastyamuni Proktam
(Yā Kundendu)

## श्री सरस्वती स्तोत्रम्

Śhrī Saraswatī Stotram

या कुन्देन्दुतुषारहारधवला

Yā Kundendutuṣhārahāradhavalā

या शुभ्रवस्त्रावृता

Yā Śhubhravastrāvṛitā

या वीणावरदण्डमंडितकरा

Yā Vīṇāvaradaṇḍamaṇḍitakarā

या श्वेतपद्मासना

Yā Śhvetapadmāsanā

या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता

Yā Brahmāchyutaśhaṅkaraprabhṛitibhirdevaiḥ sadā vanditā

सा मां पातु सरस्वती भगवती

Sā mām pātu Sarasvatī Bhagavatī

निः शेषजाड्यापहा

Niḥ śheṣhajāḍyāpahā

# 5

## जै मा

Jai Mā

## जै दुर्गा लक्ष्मी सरस्वती

Jai Durgā Lakṣhmī Sarasvatī

## पाहि जगन्माता

Pāhi Jaganmātā

## पाहि जगन्माता माम् पाहि जगन्माता

Pāhi Jaganmātā Mām Pāhi Jaganmātā